International Journal of Sanskrit Research 2024; 10(5): 23-24

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(5): 23-24
© 2024 IJSR
www.anantaajournal.com
Received: 26-06-2024
Accepted: 30-07-2024

**प्रभञ्जन भारद्वाज् .एन्**
शोधछात्रः, कर्नाटक संस्कृत विश्वविद्यालयः, कर्नाटक, भारत

**Corresponding Author:**
**प्रभञ्जन भारद्वाज् .एन्**
शोधछात्रः, कर्नाटक संस्कृत विश्वविद्यालयः, कर्नाटक, भारत

# गुणपूर्णवद्ब्रह्मैव वेदप्रतिपाद्यम्

**प्रभञ्जन भारद्वाज् णएन्**

## प्रस्तावना

भगवान् विष्णुः सकलवेदवेदान्तसारः ।सकलवाक्यानि गुणपूर्णवन्तं तमेव बोधयन्ति । तदेव उक्तवान् वेङ्कटेशनृसिंहाचार्यः अखण्डार्थत्वखण्डने स्वीये ग्रन्थे – अनन्तवेदैस्तात्पर्यात् अनन्तगुणवत्तया । बोधितःश्रीपतिः इत्यादिना । अनुमतोयमर्थः गीताचार्यस्य [1]"वेदैश्च सर्वैरहमेव वेद्यो" इत्यादिना ।

अथ कथं अनेक देवतासु सत्सु विष्णोः वेदप्रतिपाद्यत्वमिति चेत् ।अत्र सिद्धान्तः [2]शास्त्रयोनित्वादिति ।सकलशास्त्रप्रतिपाद्यत्वात् विष्णोरेव वेदप्रतिपाद्यत्वम् ।तदेवोक्तं स्कान्दे –

[3]ऋग्यजुस्सामाथर्वाश्च भारतं पञ्चरात्रकम् ।
मूलरामायणं चैव शास्त्रमित्यभिधीयते ।
यच्चानुकूल्यमेतस्य तच्च शास्त्रं प्रकीर्तितम् ।
अतो यो ग्रन्थविस्तारो नैव शास्त्रं कुवर्त्म तत् ॥इति ॥

ननु शास्त्रप्रतिपाद्यो कुतोऽन्यो न भवेत् ? पाशुपतादयः आगमाः तमेवार्थं=रुद्रादीनां सर्वोत्तमत्वं गमयन्तीति चेत् । ।ब्रह्मसूत्राभिप्रायानवगमात् । यत् यच्छास्त्रेण प्रतिपाद्यते तत् तात्पर्यलिङ्गादियुतं च भवितव्यम् ।नो चेत् काकदन्तपरीक्षाग्रन्थवदनुपादेयं स्यात् ।तत्तु [4]समन्वयादिति सकलशास्त्राणां विष्णावेव समन्वयात् । उक्तं च –

---

[1] भगवद्गीता १५-१५

[2] ब्रह्मसूत्रम् १-१-३

[3] ब्रह्मसूत्रभाष्यम् १-१-३

[4] ब्रह्मसूत्रम् १-१-४

[5]उपक्रमोपसंहारौ अभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥इति॥

अतः सर्वशास्त्राणां उपक्रमादिभ्यः गुणपूर्णविशिष्टत्वेन निर्णीतः विष्णुः । ननु निर्गुणे ब्रह्मणि सकलगुणपरिपूर्णत्वं न युज्यते । [6]एको देवस्सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥इति श्रुतेः ।अतः निर्गुण निर्धर्मक अखण्डं ब्रह्मैव वेदवाच्यम्।

अथ कस्मादिदमुच्यते निर्गुणं ब्रह्माखण्डमिति ? गुणधर्मविशिष्ट एव पदार्थः तस्य वैशिष्ट्यं च ज्ञायते इति अनुभवसिद्धम् ।प्रत्यक्षं रूपादीनां गुणधर्माणां सहैव पदार्थं बोधयति ।धूमवत्पर्वतं दृष्ट्वा धूमाग्न्योः सम्बन्धं युक्त्या जानीमः ।श्रुतयश्च सत्यंज्ञानमनन्तमानन्दं ब्रह्मेति सत्यत्वगुणविशिष्टं ज्ञानत्वगुणविशिष्टमेव ब्रह्माणमवगमयन्ति इति ।
मायावादिनः वदन्ति ।सत्यज्ञानादि श्रुतयोपि विशिष्टमेकमेव अखण्डं ब्रह्म गमयन्ति ।तथा सति न सत्यपदेन विशिष्टे ज्ञाते ज्ञानादिपदवैय्यर्थ्यमिति वाच्यम् ।किं तद् ब्रह्मेति प्रश्ने ब्रह्मबोधकवाक्यं सत्यंज्ञानमनन्तमानन्दं ब्रह्मेति । तच्च ब्रह्मस्वरूपमात्रबोधकं भवति ।न तत्र गुणधर्मवद्ब्रह्म पदवाक्यगम्यम् भवति ।किन्तु सत्यपदेन ब्रह्मणि असत्यत्वं व्यावर्तयति ।ज्ञानपदेन च ब्रह्मणि अज्ञानत्वं व्यावर्तयति । अनन्तपदेन अन्तवत्वं व्यावर्तयति । अतः एकपदेन विशिष्टे ज्ञातेऽपि अन्यपदवैय्यर्थ्यं नास्ति ।तथा च निर्गुणब्रह्मैव वेदप्रतिपाद्यः तदेवोपासितव्यमिति चेत् ।
मैवम् ।प्रत्यक्षानुमान वेदवेदान्तविरुद्धाभिप्रायादस्य । न कुत्रापि गुणधर्मलक्षणरहितं वस्तुस्वरूपं पश्यामः । कः देवदत्तः इति प्रश्ने कीदृश विशेषगुणधर्मविशिष्टः इत्येव अर्थः।तथा च निर्गुण निर्धर्मक वस्तुनः बोधनम् असङ्गतमसाधु च भवति ।मुमुक्षुणा अवश्यं गुणपूर्णब्रह्मणः उपासना कर्तव्या ।सर्वाः श्रुतयः गुणवन्तमेव ब्रह्माणं, तस्य उपासनां च बोधयन्ति ।तदेवोक्तम् ऐतरेयोपनिषदि –

[7]"एष पन्था एतत्कर्म एतद्ब्रह्मैतत्सत्यम् ।
तस्मान्न प्रमाद्येत्तन्नातीयान्न ह्यत्यायन् पूर्वे येऽत्यायंस्ते परा बभूवुः" ।

अत्र सत्यशब्दस्य श्री मध्वाचार्यः गुणपूर्णः इत्यर्थम् उक्तवान् ।

[8]"ब्रह्मैव गुणपूर्णत्वात् सत्यं साधुस्वरूपतः" ।इति

ये अत्यायन्,निर्गुणं ब्रह्मेति उपासनां कृतवन्तः,ते परा बभूवुः पराजयं प्राप्तवन्तः इत्यर्थः । अतः गुणपूर्णं ब्रह्मेति वेदान्तहृदयम् ॥

**उक्तग्रन्थसूची**


1. भगवद्गीता , श्वेताश्वतरोऽपनिषत्
2. प्रकाशनम् – गीताप्रेस् गोरखपुर
3. ब्रह्मसूत्रम् , ब्रह्मसूत्रभाष्यम्
4. सम्पादकः- प्रो. कृ.त पाण्डुरङ्गी
5. प्रकाशनम् – द्वैतवेदान्ताद्ययनसंशोधनप्रतिष्ठानम् ।बेङ्गलूरु-०४
6. ऐतरेयोपनिषत्, ऐतरेयोपनिषद्भाष्यम्
7. प्रकाशनम् – पूर्णप्रज्ञसंशोधनमन्दिरम् ।बेङ्गलूरु-२८


[5] ब्रह्मसूत्रभाष्यम् १-१-४
[6] श्वेताश्वतरोऽपनिषदत् ६-११
[7] ऐतरेयोपनिषत् २-१-१
[8] ऐतरेयोपनिषद्भाष्यम् २-१-१